2026SKT308467

2026SKT308467

2026SKT308467

# राज्य शिक्षा केन्द्र म.प्र. भोपाल

## वार्षिक परीक्षा सत्र 2025-26

## विषय-संस्कृत

| | | |
|---|---|---|
| समय-2½ घण्टे | कक्षा-8 | पूर्णांक-60 |

**बहुविकल्पीयप्रश्नाः (प्रश्न क्र. 1-5)**

**निर्देश-** उचित विकल्पं चित्वा लिखत। प्रत्येक प्रश्नस्य कृते 1 अङ्कः निर्धारितः अस्ति।

प्रश्न-1 उद्योगे किं न अस्ति? (1)

(A) दारिद्र्यम् (B) पातकम् (C) भयम् (D) धनम्

प्रश्न-2 किं बहुमूल्यं भवति- (1)

(A) आम्रकाष्ठम् (B) चन्दनकाष्ठम् (C) सागौनकाष्ठम् (D) विक्रतकाष्ठम्

प्रश्न-3 केशवदासः भाषायाः प्रसिद्धकविः अस्ति- (1)

(A) हिन्दीभाषायाः (B) संस्कृतभाषायाः (C) आंग्लभाषायाः (D) तमिलभाषायाः

प्रश्न-4 राजवाडा कुत्र अस्ति- (1)

(A) भोपालनगरे (B) शाजापुरनगरे (C) मन्दसौरनगरे (D) इन्दौरनगरे

प्रश्न-5 'खादति' पदे धातुः अस्ति- (1)

(A) खाद् (B) खद् (C) खाति (D) खादि

**रिक्तस्थानानि (प्रश्न क्र. 6-10)**

**निर्देश-** उचित-शब्दैः रिक्तस्थानानि पूरयत। प्रत्येक प्रश्नस्य कृते 1 अङ्कः निर्धारितः अस्ति।

प्रश्न-6 मनसा सततं ................................। (1)

प्रश्न-7 वसन्तऋतुः ................................ मासे भवति । (1)

प्रश्न-8 साधूनां परित्राणं एव ................................ परमधर्मः । (1)

प्रश्न-9 बालकानां संगठनं ................................ आसीत् । (1)

प्रश्न-10 'आहारम्' इत्यस्मिन् पदे ................................ उपसर्गः अस्ति । (1)

**अतिलघु-उत्तरीयप्रश्नाः (प्रश्न क्र. 11-16)**

**निर्देश-** अधोलिखितप्रश्नानाम् एकपदेन उत्तरं लिखत। प्रत्येकप्रश्नस्य कृते 2 अङ्कः निर्धारितः अस्ति।

प्रश्न-11 शंकरस्य भूषणं किम्? (2)

प्रश्न-12 ओरछानगरं परितः किम्? (2)

प्रश्न-13 नरेन्द्रनाथः कस्मात् परिव्राजकदीक्षां प्राप्नोत्? (2)

प्रश्न-14 अहिल्यायाः जन्म ग्रामः कः? (2)

प्रश्न-15 शीलं कुत्र वै धनम् । (2)

प्रश्न-16 'अधिकृत्य' पदे प्रत्ययः अस्ति। (2)

**लघु-उत्तरीयप्रश्नाः (प्रश्न क्र. 17-22)**

**निर्देश-** अधोलिखित प्रश्नानाम् उत्तराणि एकवाक्येन लिखत। (प्रत्येक प्रश्नस्य कृते 3 अङ्कः निर्धारितः अस्ति)

प्रश्न-17 गजः नयनं निमील्य केन मुग्धः अभवत्? (3)

प्रश्न-18 कोकिलाना मधुर स्वरः किम् आकर्षति। (3)

प्रश्न-19 राज्ञः धर्मः किमस्ति? (3)

प्रश्न-20 निदेशानुसारम् उत्तरं लिखत- (3)

A. चलितुम् शब्दे कः प्रत्ययः अस्ति

B. हसित्वा शब्दे का धातुः अस्ति

C. मम अनुजः मम भ्राता एव अस्ति अस्मिन् वाक्ये अव्ययम् अस्ति

प्रश्न-21 निम्नलिखितसंख्याः संस्कृतशब्देषु लिखत- (32,45,25) (3)

A. 32 B. 45 C. 25

प्रश्न-22 स्वपाठ्यपुस्तकात् एकं श्लोकं लिखत अस्मिन् प्रश्न पत्रे नास्ति ? (3)

**दीर्घ-उत्तरीय प्रश्नाः- (प्रश्न 23-26)**

प्रश्न-23 अधोलिखितपद्यांशं पठित्वा प्रश्नानाम् उत्तरं लिखत- (5)

'अयुक्तं स्वामिनो युक्तं युक्तं नीचस्य दूषणम्।
अमृतं राहवे मृत्युः विषं शङ्करभूषणम्॥'

A. स्वामिनः अयुक्तं किं भवति? B. नीचस्य युक्तं किं भवति?

C. राहवे अमृतपानात् किं अभवत्? D. विषं कस्य भूषणं अभवत्?

E. 'शङ्करभूषणम्' इत्यत्र समासभेदं लिखत।

प्रश्न-24 अधोलिखितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत- (5)

चारित्र्यबलं धारयत। अनेनैव सर्वत्र विजयो भविष्यति। दाता भव। प्रतिग्रहणस्य कामनां मा कुरु। वसन्तवल्लोकहितं चरत। परोपकारःपरमपवित्रं कार्यमस्ति। परोपकारेण चित्तं शुद्धयति। अनेनैव ईश्वरप्राप्तिः सम्भवा।

प्रश्न-

A. केन चित्तं शुद्धयति?

B. किं परमपवित्रं कार्यमस्ति?

C. अनेनैव सर्वत्र किं भविष्यति?

D. किं धारयत?

E. 'परोपकारः' इत्यस्य समासविग्रहं कुरुत।

प्रश्न-25 अधोलिखितपदैः पत्रं पूरयत्- (5)

(असमर्थ, लोकेंद्रः, अहम्, अद्य, सेवायाम्)

............

श्रीमान प्रधानाचार्यः महोदयः

शा.मा.विद्यालयः उज्जैननगरम्

महोदयः,

निवेदनम् अस्ति यत् मम् गृहे.......आवश्यकं कार्यम् अस्ति।अतः.........विद्यालयम् आगन्तुम्......... अस्मि।अतः एकदिवसस्यअवकाशं,स्वीकरोतु।

दिनाङ्क-25/08/2025

भवतः आज्ञाकारी शिष्यः

..............................

कक्षा-8वीं

प्रश्न-26 अधोलिखितेषु कस्यापि एक विषय संस्कृते पंच वाक्यानि लिखत। (5)

A. विद्यालयः B. पुस्तकं C. उद्यानं D. धेनु

------xxx------

2026SKT308467

2026SKT308467